**PURANETIHASA**

**ACHARYA 2nd YEAR**
**Course/Paper.8**

**PART - B**

# श्रीमद्देवीभागवतम् (तृतीयस्कन्धे १-३० अध्यायाः)

***Śrīmaddēvībhāgavatam (Tṛtīyaskandhē 1-30 adhyāyāḥ)***

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः
(केन्द्रीयविश्वविद्यालयः)

**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# श्रीमद्देवीभागवतम्

## तृतीयस्कन्धः (Chapter 1-30)

## स्वाध्ययनसामग्री

### उपक्रमः

मनुष्याणां जीवनं सुखमयं समृद्धिमयं तथा शान्तिमयं कर्तुं वेदानां रचनाभूत् । परन्तु साधारणमानवानामवगतये क्लिष्टकरवेदानां भाष्यभूतं पुराणसाहित्यं व्यासदेवेन विरचितम् । अष्टादश महापुराणानि, उपपुराणानि, औपपुराणानि च व्यासदेवेन रचितानि । तेषु अष्टादश संख्याकानि उपपुराणानि वर्तन्ते, तेषु देवीभागवपुराणम् अन्यततम् । देवीभागवतपुराणे 318 अध्यायाः, 18,000 श्लोकाः,द्वादशस्कन्धाश्च सन्ति पुराणवाङ्मये देवीभागवतं भुक्तिमुक्तिप्रदायकं पञ्चमपुराणमिति प्रोच्यते । अस्य पुराणस्य वक्ता महर्षिव्यासः श्रोता राजा जन्मेजयश्च भवति । पुराणमिदं वेदसम्मतं तद्धिया अर्थानुमोदितश्चास्ति । अखिलशास्त्रस्य रहस्यस्रोतरूपमिदं पुराणम् आगमे स्वस्थानं प्रसिद्धं स्थापयति । देवीभागवतस्यानुशीलनेन ज्ञायते यत् देवी एव परमतत्वमस्ति, या निर्गुणा,नित्या,सर्वव्यापिका योगगम्या,जाग्रत्स्वप्नसुप्तिभ्यः परायां तुरीयावस्थायां विराजते । तस्याःतिस्त्र: शक्तयः, सात्त्विकी राजसी तामसी चेति क्रमशः लक्ष्मीः,सरस्वती,कालीरुपेण च प्रकटी भवन्ति । अनयैव च दृष्ट्या पुराणेषु ब्रह्मविष्णुमहेश्वराः त्रिमूर्तिरूपेण वर्णिता: सन्ति ।

निर्गुणा दुर्गमा शक्तिः निर्गुणश्च पर: पुमान् ।

ज्ञानगम्यो मुनीनां तु भावनीयौ पुनः पुन: ॥

अनादिनिधनौ विद्धि सदा प्रकृतिपुरुषौ ।

एवञ्च देवीभागवतपुराणेषु प्रोक्तमस्ति यत्-

देवीभागवतं पुराणममलं यद् ब्राह्मणानां धनम्

धर्मो धर्मसुतेन यत्र गदितो नारायणेनामल: ।

गायत्र्याश्च रहस्यमत्र च मणिदीपश्च संवर्णित:

श्रीदेव्या हिमभूभृते भगवती गीता च गीता स्वयम् ॥

तत्र देवीभागवतपुराणस्य द्वादशस्कन्धेषु तृतीयस्कन्धे ब्रह्माण्डोत्पत्तिविषयकप्रश्नाः, उत्तराणि तथा त्रिदेवानां ब्रह्माण्डदर्शनादिविषयाः यथा विवृताः सन्ति, तथैव भगवत्याः कृपामाहात्म्यत्वेन सत्यव्रतचरितं, शशिकलासुदर्शनयोः परिणयवृत्तान्तः, नवरात्रविधानत्वेन श्रीरामचरितादिविषयाः अपि सम्यगालोचिताः सन्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य आदितः त्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र सारतः चतुरंशेषु उपन्यस्ताः सन्ति ।

## प्रथमांशः

### प्रस्तावना-

पुराणवाङ्मयेषु देवीभागवपुराणमेकमन्यततमं वैशिष्ट्यमारोहते । देवीभागवतपुराणे 318 अध्यायाः, 18,000 श्लोकाः,द्वादशस्कन्धाश्च सन्ति पुराणवाङ्मये देवीभागवतं भुक्तिमुक्तिप्रदायकं पञ्चमपुराणमिति प्रोच्यते। अस्य पुराणस्य वक्ता महर्षिव्यासः श्रोता राजा जन्मेजयश्च भवति । देवीभागवतस्यानुशीलनेन ज्ञायते यत् देवी एव परमतत्वमस्ति, या निर्गुणा,नित्या,सर्वव्यापिका योगगम्या,जाग्रत्स्वप्नसुप्तिभ्यः परायां तुरीयावस्थायां विराजते । तत्र देवीभागवतपुराणस्य द्वादशस्कन्धेषु तृतीयस्कन्धे ब्रह्माण्डोत्पत्तिविषयकप्रश्नाः, उत्तराणि तथा ब्रह्मविष्णवीशाः इति त्रयाणां देवानां ब्रह्माण्डदर्शनादिविषयाः यथा विवृताः सन्ति, तथैव भगवत्याः कृपामाहात्म्यत्वेन सत्यव्रतचरितं, शशिकलासुदर्शनयोः परिणयवृत्तान्तः, नवरात्रविधानत्वेन श्रीरामचरितादिविषयाश्चापि सम्यगालोचिताः सन्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य आदितः त्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र सारतः चतुरंशेषु उपन्यस्ताः सन्ति । ततः चतुरशेंषु प्रथमांशे भगवत्याः आदिशक्तेः माहात्म्यं, ब्रह्मविष्णवीशां त्रयाणां देवानां ब्रह्माण्डदर्शनञ्च मुख्यतया वर्णितमस्ति।

### उद्देश्यम् –

प्रियपाठकाः श्रीमद्देवीभागवतस्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

1. राज्ञः जन्मेजयस्य ब्रह्माण्डोत्पत्तिविषये व्यासदेवं प्रश्नः ।

2. ब्रह्मदेवस्य उत्पत्तिस्तथा विष्णुद्वारा मधुकैटभराक्षसयोः निधनवृत्तान्तः ।

3. भगवत्याः आदिशक्तेः आविर्भावविषयोपस्थापनम् ।

4. ब्रह्मविष्णवीशां त्रयाणां देवानां ब्रह्माण्डदर्शनम् ।

5. भगवतीमुद्दिश्य विष्णुस्तुत्योपस्थापनम् ।

### राज्ञः जन्मेजयस्य ब्रह्माण्डोत्पत्तिविषये व्यासदेवमुद्दिश्य प्रश्नः ।

जनमेजयः व्यासदेवं पृच्छति हे भगवन् ! भवान् अम्बायज्ञं कर्तुं नवरात्रव्रतविधानं कर्तुञ्च मामुपदिष्टवान् । अतः मम जिज्ञासा यत् का सा देवी, कथं सा प्रकटिता अभूत् । तस्याः प्रकटनस्य उद्देश्यं किं तथा कैः गुणैः सा विभूषिता भवति । एतस्मिन् विषये मां कथयतु । व्यासदेवः नारदसम्बादं स्मृत्वा कथयति- प्रलयजले भगवान् विष्णुः शेषशय्यायाः उपरि शयानः आसीत् । पूर्वकाले केवलं जलमेव आसीत् । किमपि सृष्टिः न आसीत् । तदा कमलस्य उपरि ब्रह्मदेवस्य आविर्भावः अभूत् ।

**बोधप्रश्नः-**

1. जनमेजयं अम्बायज्ञं कर्तुं कः उपदिष्टवान् ?

**ब्रह्मदेवस्य उत्पत्तिस्तथा विष्णुद्वारा मधुकैटभराक्षसयोः निधनवृत्तान्तः ।**

पुरा सूर्यः, चन्द्रमा, नदी, वृक्षादयो किमपि न आसन् । ब्रह्मदेवः कमलस्य उपरि उपविश्य चिन्तयति स्म । अहं कथम् उत्पन्नः अभवम् । मम कः रक्षकोऽस्ति । एतस्य कमलस्य मूलकारणं पङ्कः भवेदिति ब्रह्मा कमलस्य मूलम् अन्विष्यति, परन्तु मूलं न प्राप्नोति, सर्वत्र जलमेव पश्यति । तदा ब्रह्मदेवस्य कृते आकाशवाणी भवति । यथा “तपः कुरु” “तपः कुरु” इति । तदा ब्रह्मदेवः एकसहस्रवर्षं यावत् तपः कृतवान् । तदनु पुनः आकाशवाणी अभूत् । सृष्टिं कुरु, सृष्टिं कुरु इति तदा मधुकैटभौ असुरौ द्वौ उत्पन्नौ अभवताम् । ततः भयात् ब्रह्मदेवः कमलस्य निम्नदेशम् आगतवान् । तत्र सः शेषनागस्य उपरि शयानं विष्णुं दृष्टवान् । सः विष्णुः शङ्ख-चक्र-गदा- पद्मादिनि धृत्वा योगनिद्रायाम् शयानः आसीत् । तदा ब्रह्मदेवः भगवत्याः योगनिद्रायाः स्तुतिं कृतवान् । ब्रह्मदेवस्य स्तुतिहेतोः सा भगवती योगनिद्रा श्रीविष्णोः शरीरात् वहिरागता । सा भगवती आकाशे दिव्यभूषणेन विभूषिता दृश्यते स्म । विष्णुः अपि निद्रातः उत्थितः अभूत् । सः विष्णुः पञ्चसहस्रवर्षं यावत् असुरद्वयेन साकं युद्धं कृतवान् । तदा देव्याः कटाक्षेण मधुकैटभौ मोहितौ अभवताम् । तदनन्तरं भगवान् विष्णुः असुरद्वयं मारितवान् ।

**बोधप्रश्नः-**

1. विष्णुः कुत्र शयानः आसीत् ?

2. ब्रह्मदेवस्य प्रथमतः किम् आकाशवाणी अभूत् ?

**भगवत्याः आदिशक्तेः आविर्भावविषयोपस्थापनम्**

ब्रह्मदेवस्य स्तुतिहेतोः सा भगवती योगनिद्रा श्रीविष्णोः शरीरात् वहिरागता । सा भगवती आकाशे दिव्यभूषणेन विभूषिता दृश्यते स्म । विष्णुः अपि निद्रातः उत्थितः अभूत् । सः विष्णुः पञ्चसहस्रवर्षं यावत् असुरद्वयेन साकं युद्धं कृतवान् । तदा देव्याः कटाक्षेण मधुकैटभौ मोहितौ अभवताम् । तदनन्तरं भगवान् विष्णुः असुरद्वयं मारितवान् । तदा तत्र शिवः अपि प्रकटितः अभूत् । तदनु ब्रह्मा-विष्णु-महेश्वराणां कृते भगवत्याः आदिशक्तेः दर्शनम् अभूत् ।

**बोधप्रश्नः-**

1.ब्रह्मदेवस्य स्तुतिहेतोः का श्रीविष्णोः शरीरात् वहिरागता ?

2. कः पञ्चसहस्रवर्षं यावत् असुरद्वयेन साकं युद्धं कृतवान् ?

**ब्रह्मविष्ण्वीशां त्रयाणां देवानां ब्रह्माण्डदर्शनम्**

मधुकैटभराक्षसद्वयस्य वधादनन्तरं तत्र च तान् सर्वान् देवान् दृष्ट्वा भगवती सृष्टिसर्जनार्थम् अण्डज- पिण्डज- उद्भिज- स्वेदजनाम्ना प्रजाचतुष्टयं स्रष्टुम् आदिष्टवती । तदा महादेव: उक्तवान्- हे देवि वयं तु शक्तिहीना: कथं वा सृष्टिसर्जने समर्था: भविष्यामः । तस्मिन् समये गगनात् एकं विमानमागतम् । तद्यथा -

झटित्येवागतं तत्र विमानं गगनाच्छुभम् ।

सोवाचास्मिन्सुराः कामं विशध्वं गतसाध्वसाः ॥

तदा ब्रह्मविष्ण्वीशाः इति त्रयः देवाः अद्भूतदृश्यानि द्रष्टुं तत् विमानमारुह्य आकाशमण्डलं प्रति प्रस्थिताः । तदनु तत् विमानमेकं चमत्कारपूर्णं दिव्याकारमण्डितं नगरं गतम् । तत्स्थानं यज्ञशालासमायुक्तं नाना आश्चर्यसमन्वितं सम्यक् साधु सुशोभितञ्चासीत् । तत्र एको राजा दृश्यमानोभूत् । पुन: विमानं आकाशमार्गे उड्डीय एकस्मिन् सुरम्यदेशे उपनतमभूत् । तत्र नन्दनवनं,पारिजातपुष्पं,कामधेनुः,

ऐरावतगजः,मेनकादयःअप्सरोगणाः,गन्धर्वयक्षविद्याधराः,वरुणः,कुबेरः,यमः,अग्निप्रभृतयः देवाः दृष्टिगोचराः अभवन् । तदनन्तरं ब्रह्मविष्ण्वीशाः इति  त्रयो देवाः तेन विमानेन ब्रह्मलोकं प्राप्तवन्तः । यत्र ब्रह्मदेवो विराजितः आसीत् । तद्यथा-

ब्रह्मलोकं तदा दिव्यं सर्वदेवनमस्कृतम् ।

तत्र ब्रह्माणमालोक्य विस्मितौ हरकेशवौ ॥

तत्र त्रयः देवा: द्वितीयं ब्रह्मदेवं दृष्ट्वा विस्मिताः अभवन् । ततः तत् विमानं यक्षगणद्वारा सुशोभितं मन्दारवाटिकया रम्यं, कोकिलगुञ्जितं, वीणामृदङ्गादिवाद्ययन्त्राणां मधुरध्वन्या मुखरितं सुखदायिनं कैलासशिखरं प्राप्तवन्तः । तस्मिन्शिखरे वृषभारूढः, पञ्चमुखः,दशभुजः, अर्धचन्द्रधारी भगवान् शङ्करः दिव्यभवनात् बहिरागतः । यथा-

निर्गतो भगवाञ्छम्भुर्वृषारूढस्त्रिलोचनः ।

पञ्चाननी दशभुज: कृतसोमार्धशेखरः ।।

तत्रापि ते देवाः शङ्करं दृष्ट्वा विस्मिता: अभवन् ततः ते तेन विमानेन वैकुण्ठलोकं प्रति आगताः । तत्रापि लक्ष्मीदेव्या सह नारायणं दृष्ट्वा ते त्रय: देवाः विधिविष्णुमहेशाः आश्चर्यचकिततया परस्परं संलाप्य ततः अग्रेसारिताः सुधासमुद्रं प्राप्तवन्त: । तस्मिन् द्वीपे नानारत्नशोभाढ्या परमाद्भूता सुमनोहरा कापि वराङ्गना उपविष्टा आसीत् । तत्र वरपाशाङ्कुशाम् अभीष्टधरां श्रीभुवनेश्वरीं भगवतीं श्रीदेवीं ते त्रयः देवाः दृष्टवन्तः । तां भगवतीं दृष्ट्वा सा का इति ते ज्ञातुमसमर्थाः सञ्जाताः । भगवतीम् आदिशक्तिं दृष्ट्वा एते मुग्धा अभवन् । ब्रह्मा-विष्णु-महेशाः भगवत्याः समीपे आगतवन्तः । तदा भगवत्याः समीपे एते स्त्रीरूपं प्राप्तवन्तः। भगवतीं प्रणम्य भगवत्याः समक्षे उपविष्टाः अभवन् । भगवत्याः

नखकोणे ते देवाः समग्रभवनं विश्वञ्च दृष्टवन्तः । तदा विष्णुः उक्तवान् एषा एव भगवती आदिशक्तिः जगतः जननी भवति । तदा भगवान् विष्णुः भगवत्याः स्तुतिं कृतवान् ।

**बोधप्रश्नः-**

1. त्रयः देवाः अद्भूतदृश्यानि द्रष्टुं किमारुह्य आकाशमण्डलं प्रति प्रस्थिताः ?

2. भगवत्याः नखकोणे ते देवाः किं दृष्टवन्तः ?

## भगवतीमुद्दिश्य विष्णुस्तुत्योपस्थापनम्

भगवत्याः नखकोणे ते देवाः समग्रभवनं विश्वञ्च दृष्टवन्तः । तदा विष्णुः उक्तवान् एषा एव भगवती आदिशक्तिः जगतः जननी भवति । तदा भगवान् विष्णुः भगवत्याः स्तुतिं कृतवान् । तद्यथा- प्रकृतिदेव्यै नमः । हे भगवति! भवती कल्याणस्वरूपिणी मनोरथञ्च पूरयति । भवती बुद्धिं ददाति सिद्धिस्वरूपा च अस्ति । त्वां वारम्बारं नमस्करोमि । भवती एव सृष्टि-स्थिति-संहारस्य मूलकारणं भवति । अतः त्वां भगवतीं भुवनेश्वरीं प्रणमामि । सर्वाभीष्टानां पूरणकारिणीं भगवतीं नमामि । मातः! अहं ज्ञातवान् यत् एतस्मिन् सम्पूर्णसंसारे त्वमेव विराजसे । भवती एतस्य जगतः सृष्टिसंहारस्य च तत्त्वं भवति । तव एव व्यापकमाया संसारे ममत्वं सज्जीकरोति । भवती एव अखिल-जगन्मयी माता अस्ति । भवती एव अखिलविश्वे व्यापकरूपेण विराजमाना वर्तते । देवि! प्रलयकाले भवती एव संसारं भक्षयति । भगवति! तव वैभवं चरित्रं वा कः ज्ञातुं शक्नुयात् । मातः! भवती एव मधुकैटभौ इति असुरद्वयात् अस्मान् रक्षितवती । भवानि! यदा अहं,शङ्करः, ब्रह्मा च भवत्याः विषये अज्ञाताः भवामः, तदा अन्यः कः तव विषये ज्ञातुं शक्नुयात् । समग्रविश्वमेव तव नखदर्पणे दृश्यते । देवि! तव एतत् विस्तृतं अचिन्त्यम् ऐश्वर्यं नराः कथं जानीयुः । मातृपुत्रैव आवयोः सम्बन्धः सर्वदा तिष्ठतु। जगदम्बे! भवती एव समग्रजगत्प्रपञ्चं जानाति । हे भवानि! तव इच्छातः एव शक्तिं प्राप्य ब्रह्मा सृजति, विष्णुः पालयति, महेशश्च संहरति । गिरिजानन्दिनि! त्वमेव सर्वेषां माता असि । जगत्सृजनं, पालनं संहरणञ्च तव स्वाभाविककार्यं भवति । भगवति! तव शक्तितः एव शक्तिं प्राप्य सूर्यः जगदिदं प्रकाशयति । भवती समग्रसंसारं

उद्भासयति । अहं ब्रह्मा शङ्करश्च तव कृपातः एव भवामः । अस्माकं आर्विभावः तिरोभावश्च भवति । केवलं त्वं जगत्जननी असि । भवती बुद्धिमतां जनानां बुद्धिः, शक्तिमतां जनानां शक्तिश्च भवति । त्वं शुद्धस्वरूपा असि । मुक्तिदानं तव स्वाभाविककार्यं भवति । वेदस्य मुख्यविषयः गायत्री भवती एव भवति । स्वाहा, स्वधा एवं ओम् भवत्याः रूपाणि भवन्ति । भवती देवानां रक्षणार्थं वेदशास्त्राणां रचनां कृतवती । जीवानाम् उदाहरणार्थं भवती अखिलजगदिदं रचितवती । देवि! भवती महाविद्या स्वरूपिणी अस्ति । तव रूपं कल्याणमयमस्ति । त्वं सम्पूर्णं मनोरथं पूरयसि । तव चरणयोः वारम्बारं प्रणौमि ।

**बोधप्रश्नः-**

1. कः उक्तवान् एषा एव सा भगवती आदिशक्तिः जगज्जननीति ?

2. का कल्याणस्वरूपिणी मनोरथञ्च पूरयति ?

## सारांशः

श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य प्रस्तुतपाठ्यक्रमेस्मिन् प्रथमांशे भगवत्याः आदिशक्तेः माहात्म्यं सम्यगुपस्थापितमस्ति । प्रलयजले भगवान् विष्णुः शेषशय्यायाः उपरि शयानः आसीत् । पूर्वकाले केवलं जलमेव आसीत् । किमपि सृष्टिः न आसीत् । तदा कमलस्य उपरि ब्रह्मदेवस्य आविर्भावः अभूत् । । तदा ब्रह्मदेवस्य कृते आकाशवाणी भवति । यथा "तपः कुरु" "तपः कुरु" इति । तदा ब्रह्मदेवः एकसहस्त्रवर्षं यावत् तपः कृतवान् । तदनु पुनः आकाशवाणी अभूत् । सृष्टिं कुरु, सृष्टिं कुरु इति तदा मधुकैटभौ असुरौ द्वौ उत्पन्नौ अभवताम् । ततः भयात् ब्रह्मदेवः कमलस्य निम्नदेशम् आगतवान् । तत्र सः शेषनागस्य उपरि शयानं विष्णुं दृष्टवान् । सः विष्णुः शङ्ख-चक्र-गदा- पद्मादिनि धृत्वा योगनिद्रायां शयानः आसीत् । तदा ब्रह्मदेवः भगवत्याः योगनिद्रायाः स्तुतिं कृतवान् । ब्रह्मदेवस्य स्तुतिहेतोः सा भगवती योगनिद्रा श्रीविष्णोः शरीरात् वहिरागता । सा भगवती आकाशे दिव्यभूषणेन विभूषिता दृश्यते स्म । विष्णुः अपि निद्रातः उत्थितः अभूत् । सः विष्णुः पञ्चसहस्त्रवर्षं यावत् असुरद्वयेन साकं युद्धं कृतवान् । तदा देव्याः कटाक्षेण मधुकैटभौ मोहितौ अभवताम् । तदनन्तरं भगवान् विष्णुः असुरद्वयं मारितवान् । तदा तत्र शिवः अपि प्रकटितः अभूत् । तदनु ब्रह्मा-विष्णु-

महेश्वराणां कृते भगवत्याः आदिशक्तेः दर्शनम् अभूत् । तदा भगवान् विष्णुः भगवत्याः स्तुतिं कृतवान् । देवि! भवती महाविद्या स्वरूपिणी अस्ति । तव रूपं कल्याणमयमस्ति । त्वं सम्पूर्णं मनोरथं पूरयसि । तव चरणयोः वारम्बारं प्रणौमि ।

## आदर्शप्रश्नाः

**लघुत्तरीयप्रश्नाः-**

1. ब्रह्मविष्णवीशाः इति त्रिदेवानां इन्द्रलोकदर्शनं लिखत ।
2. ब्रह्मविष्णवीशानां त्रयाणां देवानां ब्रह्मलोकदर्शनवृत्तान्तमाविष्कुरुत ।
3. ब्रह्मविष्णवीशानां त्रयाणां देवानां विष्णुलोकदर्शनमुद्दिश्य लिखत ।

**विश्लेषणात्मकप्रश्नाः-**

1. सृष्ट्युत्पत्तिविषये व्यासनारदसम्बादमुपस्थापयत ।
2. ब्रह्मविष्णवीशानां त्रयाणां देवानां कैलासदर्शनमुपस्थापयत ।

**निबन्धात्मकप्रश्नाः-**

1. राज्ञः जन्मेजयस्य व्यासदेवमुद्दिश्य ब्रह्माण्डोत्पत्तिविषयचर्चामालोचयत ।
2. ब्रह्मविष्णवीशानां त्रयाणां देवानां ब्रह्माण्डदर्शनमालोचयत ।

**एकाङ्कप्रश्नाः-**

1. अम्बायज्ञस्य आयोजनं कः कृतवान् ।
2. जन्मेजयः कस्य पुत्रः आसीत् ।
3. स्वर्लोकस्य राजा कः ।
4. विष्णुः कुत्र शयानः आसीत् ।
5. कैलासपर्वते कः तिष्ठति ।
6. मधुकैटभराक्षसद्वयं केन मारितम् ।

7. ब्रह्मदेवः कस्य स्तुतिं कृतवान् ।

8. शेषशय्यायां शयानस्य विष्णोः शरीरात् का निर्गता ।

9. भगवत्याः नखकोणे त्रयः देवाः किं दृष्टवन्तः ।

10. कः भगवत्याः स्तुतिं कृतवान् ।

**उत्तराणि-** 1. राजा जन्मेजयः 2.जन्मेजयः परिक्षितराजस्य पुत्रः आसीत् 3.इन्द्रः 4. क्षीरसागरे 5. शिवः 6. विष्णुः 7. भगवत्याः योगमायायाः 8.योगमाया 9.समग्रब्रह्माण्डमपि 10. विष्णुः

**-------------********-----------**

## द्वितीयांशः

**प्रस्थावना-**

पुराणवाङ्मयेषु देवीभागवपुराणमेकमन्यततमं वैशिष्ट्यमारोहते । देवीभागवतपुराणे 318 अध्यायाः, 18,000 श्लोकाः,द्वादशस्कन्धाश्च सन्ति पुराणवाङ्मये देवीभागवतं भुक्तिमुक्तिप्रदायकं पञ्चमपुराणमिति प्रोच्यते । अस्य पुराणस्य वक्ता महर्षिव्यासः श्रोता राजा जन्मेजयश्च भवति । देवीभागवतस्यानुशीलनेन ज्ञायते यत् देवी एव परमतत्वमस्ति, या निर्गुणा,नित्या,सर्वव्यापिका योगगम्या,जाग्रत्स्वप्रसुप्तिभ्यः परायां तुरीयावस्थायां विराजते । तत्र देवीभागवतपुराणस्य द्वादशस्कन्धेषु तृतीयस्कन्धे ब्रह्माण्डोत्पत्तिविषयकप्रश्नाः, उत्तराणि तथा ब्रह्मविष्णवीशानां त्रयाणां देवानां ब्रह्माण्डदर्शनादिविषयाः यथा विवृताः सन्ति, तथैव भगवत्याः कृपामाहात्म्यत्वेन सत्यव्रतचरितं, शशिकलासुदर्शनयोः परिणयवृत्तान्तः, नवरात्रविधानत्वेन श्रीरामचरितादिविषयाश्चापि सम्यगालोचिताः सन्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य आदितः त्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र सारतः चतुरंशेषु उपन्यस्ताः सन्ति । ततः चतुरशेंषु द्वितीयांशेस्मिन् मुख्यतया देवीकृपातः ब्राह्मणदेवदत्तपुत्रस्य मूर्खस्य उतथ्यस्य सारस्वतबीजमन्त्रः ऐं इति उच्चारणेन सत्यव्रतमुनिरूपेण सम्पूर्णविद्याधिगतत्वं लोकप्रसिद्धिश्च सम्यक् वर्णिताः सन्ति ।

**उद्देश्यम्-**

प्रियपाठकाः श्रीमद्देवीभागवतस्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

**1. कः देवः सर्वश्रेष्ठः पूज्यतमश्च भवतीति मुनिसमाजगतविचारमुद्दिश्य लोमशमुनेः सत्यव्रतचरितोपस्थापनोपक्रमः**

**2. देवदत्तनामकः विख्यातब्राह्मणस्य पुत्रेष्टियज्ञविधानविषयाविष्करणम्**

**3. देवदत्तपुत्रस्य जन्मजातमूर्खस्य उतथ्यस्य वनगमनं सत्यव्रतनाम्ना परिचयप्रसिद्धिश्च**

**4. सारस्वतबीजमन्त्रः ऐं इति उच्चारणेन देवीकृपातः सत्यव्रतमुनेः सम्पूर्णविद्याधिगतत्वं लोकप्रसिद्धिश्च**

**कः देवः सर्वश्रेष्ठः पूज्यतमश्च भवतीति मुनिसमाजगतविचारमुद्दिश्य लोमशमुनेः सत्यव्रतचरितोपस्थापनोपक्रमः**

जनमेजयः व्यासदेवं पृष्टवान् यत्- सः द्विजश्रेष्ठः ब्राह्मणः कः? कस्मिन् देशे सः उत्पन्नः अभूत् । तस्य स्वभावं कीदृशमिति मां कथयतु । सः ब्राह्मणः सत्यव्रतः ऐं इति शब्दं श्रुत्वा तस्य उच्चारणं कृतवान् । ततः कथं सः सिद्धिं प्राप्तवान् । भगवती अम्बिका तस्मिन् प्रसन्नः अभूत् । एतत्सर्वं कृपया मां कथयतु । तदनु व्यासदेवः सविस्तरं सत्यव्रतचरितं कथयति । पूर्वकाले एकदा मुनीनां समाजे विचारः अभूत्- यत् कः देवः सर्वश्रेष्ठः पूज्यतमश्च भवति । कः देवः विशेषरूपेण उपासनीयः । कः देवः अभीष्टफलं ददाति । एतस्य प्रश्नस्य उत्तरेण लोमशमुनिः उक्तवान् यत् सर्वेऽपि बुद्धिमन्तः कल्याणकामिनः पुरुषाः महाशक्तेः भगवत्याः अम्बिकायाः उपासनां कुर्युः । सा पराप्रकृतिः सर्वदा विराजमाना भवति एवं सर्वमपि दातुं सा कल्याणमयी सिद्धा अस्ति । सा एव सर्वेषां देवानाम् आदिजननी अस्ति । तस्याः स्मरणेन सा अभीष्टफलं प्रयच्छति मनोरथञ्च पूरयति । एतस्मिन् विषये एकपावनकथामहं कथयामि । कथं ऐकारस्य उच्चारणेन ब्राह्मणः सत्यव्रतः मोक्षं प्राप्तवान् इति ।

**बोधप्रश्नः-**

1. पूर्वकाले एकदा मुनीनां समाजे किं विचारः अभूत् ?

**देवदत्तनामकः विख्यातब्राह्मणस्य पुत्रेष्टियज्ञविधानविषयाविष्करणम्**

कोशलदेशे देवदत्तनामकः एकः विख्यातः ब्राह्मणः तिष्ठति स्म । तस्य कोऽपि सन्तानः नासीत् । पुत्रप्राप्त्यर्थं सः पुत्रेष्टियज्ञं कृतवान् । सर्वेऽपि वेदज्ञब्राह्मणाः यज्ञस्य आयोजनं कृतवन्तः । तस्मिन् यज्ञे सुहोत्र ब्रह्मा, याज्ञवल्क्य अध्वर्युः, बृहस्पतिः होता पैलमुनिः प्रस्तोता, गोभिलमुनिः उद्गाता च आसन् । मुनिवरः गोभिलः रथन्तरच्छन्दसा गानं करोति स्म । तदा तस्य स्वरभङ्गः अभूत् । निश्वास-प्रश्वास-हेतोः तस्य स्वरभङ्गोभूत् । तदा यज्ञकर्ता देवदत्तः कुपितः अभूत् । देवदत्तः मुनिवरं गोभिलं भर्त्सितवान् । महात्मा गोभिलः अपि कुपितः अभूत् । देवदत्तस्य भर्त्सनं श्रुत्वा सः तस्मै अभिशापं दत्तवान् । हे देवदत्त! भवतः एकः मूर्खपुत्रः भविष्यति । तदा देवदत्तः मुनेः पादौ पतित्वा क्षमायाचनां कृतवान् । मुनिः शान्तः भूत्वा

उक्तवान् यत् तव पुत्रः मूर्खः भूत्वा अपि अनन्तरं पण्डितः भविष्यति । अनन्तरं शुभकाले देवदत्तस्य पत्नी एकं पुत्रं जनयामास । तस्य नाम उतथ्य इति अभूत् ।

**बोधप्रश्नः -**

1. पुत्रेष्टियज्ञं कः कृतवान् ?

2. कः मुनिः देवदत्तमभिशप्तवान् ?

**देवदत्तपुत्रस्य जन्मजातमूर्खस्य उतथ्यस्य वनगमनं सत्यव्रतनाम्ना तस्य परिचयप्रसिद्धिश्च**

ब्राह्मणदेवदत्तस्य सः पुत्रः उतथ्यः पठितुं गुरुगृहं गतवान् । बहुवर्षं पठित्वा अपि तस्य किमपि ज्ञानं नाभूत् । एकशब्दमपि उच्चारयितुं सः समर्थः नाभूत् । सः किमपि शास्त्रं न जानाति स्म, सन्ध्यावन्दनादिकमपि न जानाति स्म । अतः सः मूर्ख इति सर्वत्र प्रचारितः अभूत् । सर्वे तस्य उपहासं कृतवन्तः। पितरौ अपि निन्दां कृतवन्तौ । यदा सर्वे जनाः माता, पिता सर्वेऽपि तस्य अत्यन्तनिन्दां कृतवन्तः, तदा तस्य मनसि वैराग्यमागतम् । सः वनं गतवान् । गङ्गातटे एकस्मिन् स्थाने कुटीरं निर्माय वन्यफलं मूलञ्च भुक्त्वा सः जीवनं यापयति स्म । सः इन्द्रियसंयमं स्थापयित्वा एकनियमं स्थापितवान् यत्- अहं कदापि मिथ्या न कथयिष्यामि । एवं सः तत्र वने ब्रह्मचर्यजीवनं यापयति स्म । सः ब्राह्मणः उतथ्यः वेदाध्ययनं जपञ्च न जानाति स्म। वेदाध्ययनम्, आसनं, ध्यानं, प्राणायामं, भूतशुद्ध्यादिकमपि किमपि सः न जानाति स्म। गायत्रीमन्त्रविषये अपि सः अनभिज्ञः एवासीत् । सः नित्यकर्मादिषु मन्त्रोच्चारणं किमपि न जानाति स्म । सः केवलं प्रातः उत्थाय तथा कथञ्चित् दन्तधावनं कृत्वा विना मन्त्रं शूद्रः इव गङ्गायां स्नानं करोति स्म । मध्याह्नकाले अरण्यतः स्वेच्छया किमपि फलमूलमानीय उदरपूर्तिं करोति स्म । परन्तु सः सर्वदा सत्यं एव कथयति स्म । तस्य मुखतः कदापि मिथ्या नागच्छति स्म । अतः तत्रत्याः जनाः तं ब्राह्मणं सत्यव्रत इति नाम्ना आह्वयन्ति स्म । सः एवम्प्रकारेण वने केवलं जीवनं यापयति स्म ।

**बोधप्रश्नः-**

1.कस्मिन् नदीतटे ब्राह्मणः उतथ्यः कुटीरं निर्माय वन्यफलं मूलञ्च भुक्त्वा जीवनं यापयति स्म ?

**सारस्वतबीजमन्त्रः ऐं इति उच्चारणेन देवीकृपातः सत्यव्रतमुनेः सम्पूर्णविद्याधिगतत्वं लोकप्रसिद्धिश्च**

एकदा एकः निषादः तत्र हस्ते धनुर्बाणं धृत्वा आगतवान् । सः वने एकं शूकरं शरेण विद्धवान् । ततः भयभीतः सः शूकरः शीघ्रं धावन् उतथ्यमुनेः आश्रमे आगतवान् । तदा शूकरस्य शरीरं रक्ताक्तमासीत् एवं सः भयेन कम्पते स्म । तं दीनहीनं पशुम् उतथ्यमुनिः दृष्टवान् । ततः मुनेः हृदये दया आगता । एवं तस्य मुखात् भगवत्याः सारस्वतबीजं ऐं इति उच्चारितमभूत् । पूर्वं कदापि सः एनं मन्त्रं न जानाति स्म । कदापि न श्रुतवान् अपि आसीत् । कस्मादपि अदृष्टप्रेरणया तस्य मुखे ऐं इति मन्त्रः आगतः । सः उतथ्यः तु अत्यन्तः अज्ञानी आसीत् । सः सारस्वतबीजमन्त्रः इति किमपि न जानाति स्म । शोकवशात् तस्य मुखे एषः मन्त्रः आगतः । तदा सः क्षताक्तः शूकरः आश्रमसमीपे लुक्कायितः अभूत् । तदा सः निषादः धनुर्बाणं नीत्वा तत्र उपस्थितः अभूत् । सः व्याधः मुनिम् उतथ्यं वारम्बारं पृष्टवान् यत्- हे मुने! भवान् सत्यव्रती अस्ति । अतः भवान् कथयतु बाणविद्धः सः शूकरः कुत्र गतः । मम समग्रपरिवारः बुभुक्षायामस्ति । विधाता मम कृते एनां वृत्तिं दत्तवान् । मम अन्या कापि वृत्तिः नास्ति । अनया वृत्त्या एव अहं परिवारस्य परिपालनं करोमि । अतः हे ब्राह्मणदेव! भवान् सत्यं कथयतु । सः शूकरः कुत्र गतः इति । व्याधस्य वचनं श्रुत्वा मुनेः मनसि बहुविचारः आगतः । सः चिन्तितवान् यदि अहं सत्यं कथयिष्यामि तदा व्याधः शूकरं नेष्यति । असत्यं कथयामि चेत् मम व्रतहानिः भविष्यति । एवं किमपि कथयिष्यामि येन मम वाणी मिथ्या न भवेत् एवं शूकरस्य जीवनहानिरपि न भवेत् । प्रथमतः बाणविद्धं शूकरं दृष्ट्वा दयावशात् तस्य मुखात् सरस्वत्याः सारस्वतबीजमन्त्रः ऐं इति उच्चारितमासीत् । ऐं इति भवति वागबीजमन्त्रः । ततः तमेव मन्त्रं श्रुत्वा भगवती उतथ्यमुनेः उपरि प्रसन्ना अभूत् । अतः देवीकृपातः उतथ्यमुनेः कृते सम्पूर्णविद्या आगता । तस्य मनसि सर्वविद्याः स्फुरिताः अभवन् । सः एकः महान् कविरभूत् । तदेव तस्य मुखादेकः श्लोकः निर्गतः –

या पश्यति न सा ब्रूते या ब्रूते सा न पश्यति ।

अहो व्याधः स्वकार्यार्थी किं पृच्छसि पुनः पुनः ।।

तस्य तात्पर्यं भवति यत् हे व्याध! यत् नयनं पश्यति तत् न कथयति, या वाणी कथयति सा न पश्यति । अतः हे व्याध! भवान् पुनः पुनः मां किमर्थं पृच्छति । मुनिवरस्य कथनादनन्तरं सः व्याधः ततः निर्गतः अभूत् । एवं शूकरस्य जीवनरक्षा अभूत् । इदानीं देवीकृपातः उतथ्यमुनिः वाल्मीकि इव प्रकाण्डः विद्वान् अभूत् । समग्रभूमण्डले सत्यव्रत इति नाम्ना तस्य प्रसिद्धिरभूत् । तदनु अनन्तरं सारस्वतबीजमन्त्रः ऐं इति सः विधिवत् जपं कृतवान् । ततः जगति तस्य वैदुष्यं यशो च चर्तुदिक्षु प्रसारितमभूत् । ब्राह्मणजनाः उत्सवादिषु तस्य यशोगानं कृतवन्तः । सत्यव्रतस्य माहात्म्यं श्रुत्वा तस्य परिवारजनाः वनमागत्य बहुमानेन सत्कारेण च तं मुनिं गृहं नीतवन्तः । अतएव हे राजन्! तस्याः एव आदिशक्तेः भगवत्याः जगदम्बिकायाः सदैव भक्तिपूर्वकतया उपासना करणीया भवति। भगवत्याः कृपातः जनस्य सर्वकल्याणं भवितुमर्हति ।

बोधप्रश्नः-

1. निषादः वने कं शरेण विद्धवान् ?

2. सारस्वतबीजमन्त्रः नाम कः ?

## सारांशः

व्यासदेवः सविस्तरं सत्यव्रतचरितं कथयति । पूर्वकाले एकदा मुनीनां समाजे विचारः अभूत्- यत् कः देवः सर्वश्रेष्ठः पूज्यतमश्च भवति । कः देवः विशेषरूपेण उपासनीयः । कः देवः अभीष्टफलं ददाति । एतस्य प्रश्नस्य उत्तरेण लोमशमुनिः उक्तवान् यत् सर्वेऽपि बुद्धिमन्तः कल्याणकामिनः पुरुषाः महाशक्तेः भगवत्याः अम्बिकायाः उपासनां कुर्युः । तस्मिन् प्रसङ्गे कथं ऐकारस्य उच्चारणेन ब्राह्मणः सत्यव्रतः देवीकृपातः लोकप्रसिद्धिं मोक्षञ्च प्राप्तवानिति एकमाख्यानमुक्तवान् । पुरा कोशलदेशे देवदत्तनामकः एकः विख्यातः ब्राह्मणः तिष्ठति स्म । तस्य कोऽपि सन्तानः नासीत् । पुत्रप्राप्त्यर्थं सः पुत्रेष्टियज्ञं कृतवान् । गोभिलमुनिः उद्गाता च

आसन् । मुनिवरः गोभिलः रथन्तरच्छन्दसा गानं करोति स्म । तदा तस्य स्वरभङ्गः अभूत् । ब्राह्मणः देवदत्तः मुनिवरं गोभिलं भर्त्सितवान् । महात्मा गोभिलः अपि कुपितः अभूत् । देवदत्तस्य भर्त्सनं श्रुत्वा सः तस्मै अभिशापं दत्तवान् । हे देवदत्त! भवतः एकः मूर्खपुत्रः भविष्यति । तदा देवदत्तः मुनेः पादौ पतित्वा क्षमायाचनां कृतवान् । मुनिः शान्तः भूत्वा उक्तवान् यत् तव पुत्रः मूर्खः भूत्वा अपि अनन्तरं पण्डितः भविष्यति । अनन्तरं शुभकाले देवदत्तस्य पत्नी एकं पुत्रं जनयामास । तस्य नाम उतथ्य इति अभूत् । ब्राह्मणदेवदत्तस्य सः पुत्रः उतथ्यः पठितुं गुरुगृहं गतवान् । बहुवर्षं पठित्वा अपि तस्य किमपि ज्ञानं नाभूत् । एकशब्दमपि उच्चारयितुं सः समर्थः नाभूत् । सः किमपि शास्त्रं न जानाति स्म, सन्ध्यावन्दनादिकमपि न जानाति स्म । अतः सः मूर्ख इति सर्वत्र प्रचारितः अभूत् । सर्वे तस्य उपहासं कृतवन्तः। पितरौ अपि निन्दां कृतवन्तौ । यदा जनाः माता, पिता सर्वेऽपि च जनाः तस्य अत्यन्तनिन्दां कृतवन्तः, तदा तस्य मनसि वैराग्यमागतम् । सः वनं गतवान् । गङ्गातटे एकस्मिन् स्थाने कुटीरं निर्माय वन्यफलं मूलञ्च भुक्त्वा सः जीवनं यापयति स्म । सः इन्द्रियसंयमं स्थापयित्वा एकनियमं स्थापितवान् यत्- अहं कदापि मिथ्या न कथयिष्यामि । अतः तत्रत्याः जनाः तं ब्राह्मणं सत्यव्रत इति नाम्ना आह्वयन्ति स्म । एवम्प्रकारेण सः वने केवलं ब्रह्मचर्यधारणपूर्वकं फलमूलानि भुक्त्वा जीवनं यापयति स्म ।

एकदा एकः निषादः तत्र हस्ते धनुर्बाणं धृत्वा आगतवान् । सः वने एकं शूकरं शरेण विद्धवान् । ततः भयभीतः सः शूकरः शीघ्रं धावन् उतथ्यमुनेः आश्रमे आगतवान् । तदा शूकरस्य शरीरं रक्ताक्तमासीत् एवं सः भयेन कम्पते स्म । तं दीनहीनं पशुम् उतथ्यमुनिः दृष्टवान् । ततः मुनेः हृदये दया आगता । एवं तस्य मुखात् भगवत्याः सारस्वतबीजमन्त्रः ऐं इति उच्चारितमभूत् । पूर्वं कदापि सः एनं मन्त्रं न जानाति स्म । कदापि न श्रुतवान् अपि आसीत् । कस्मादपि अदृष्टप्रेरणया शोकवशात् तस्य मुखे एषः मन्त्रः आगतः । तदा सः निषादः धनुर्बाणं नीत्वा तत्र उपस्थितः अभूत् । सः व्याधः मुनिम् उतथ्यं वारम्बारं पृष्टवान् यत्- हे मुने! भवान् सत्यव्रती अस्ति । अतः भवान् कथयतु बाणविद्धः सः शूकरः कुत्र गतः । व्याधस्य वचनं श्रुत्वा मुनेः मनसि बहुविचारः आगतः । सः चिन्तितवान् यदि अहं सत्यं कथयिष्यामि तदा व्याधः शूकरं नेष्यति । असत्यं कथयामि चेत् मम व्रतहानिः भविष्यति । एवं किमपि कथयिष्यामि येन मम वाणी मिथ्या न भवेत् एवं शूकरस्य जीवनहानिरपि न भवेत् । प्रथमतः बाणविद्धं शूकरं दृष्ट्वा दयावशात् तस्य मुखात् सरस्वत्याः सारस्वतबीजमन्त्रः ऐं इति उच्चारितमासीत् । ऐं इति भवति वागबीजमन्त्रः । ततः तमेव मन्त्रं श्रुत्वा भगवती उतथ्यमुनेः उपरि प्रसन्ना अभूत् । अतः देवीकृपातः उतथ्यमुनेः कृते

सम्पूर्णविद्या आगता। तस्य मनसि सर्वविद्याः स्फुरिताः अभवन्। सः एकः महान् कविरभूत्। तदेव तस्य मुखादेकः श्लोकः निर्गतः –

या पश्यति न सा ब्रूते या ब्रूते सा न पश्यति।

अहो व्याधः स्वकार्यार्थी किं पृच्छसि पुनः पुनः ।।

तस्य तात्पर्यं भवति यत् हे व्याध! यत् नयनं पश्यति तत् न कथयति, या वाणी कथयति सा न पश्यति। अतः हे व्याध! भवान् पुनः पुनः मां किमर्थं पृच्छति। मुनिवरस्य कथनादनन्तरं सः व्याधः ततः निर्गतः अभूत्। एवं शूकरस्य जीवनरक्षा अभूत्। इदानीं देवीकृपातः उतथ्यमुनिः वाल्मीकि इव प्रकाण्डः विद्वान् अभूत्। समग्रभूमण्डले सत्यव्रत इति नाम्ना तस्य प्रसिद्धिरभूत्। तदनु अनन्तरं सारस्वतबीजमन्त्रः ऐं इति सः विधिवत् जपं कृतवान्। ततः जगति तस्य वैदुष्यं यशो च चर्तुदिक्षु प्रसारितमभूत्। ब्राह्मणजनाः उत्सवादिषु तस्य यशोगानं कृतवन्तः। सत्यव्रतस्य माहात्म्यं श्रुत्वा तस्य परिवारजनाः वनमागत्य बहुमानेन सत्कारेण च तं मुनिं गृहं नीतवन्तः। अतएव हे राजन्! तस्याः एव आदिशक्तेः भगवत्याः जगदम्बिकायाः सदैव भक्तिपूर्वकतया उपासना करणीया भवति। भगवत्याः कृपातः जनस्य सर्वकल्याणं भवितुमर्हति। एवम्प्रकारेण पाठ्यक्रमेस्मिन् द्वितीयांशस्य सारांशत्वेन एते विषयाः उपन्यस्ताः सन्ति।

## आदर्शप्रश्नाः

**लघुत्तरीयप्रश्नाः-**

1. ब्राह्मणदेवदत्तस्य पुत्रेष्टियज्ञविधानक्रममुपस्थापयत।

2. देवदत्तपुत्रस्य उतथ्यस्य वनगमनविषयं लिखत।

3. सारस्वतबीजमन्त्रमुद्दिश्य लिखत।

**विश्लेषणात्मकप्रश्नाः-**

1. देवदत्तं प्रति गोभिलमुनेः अभिशापदानक्रममुपस्थापयत।

2. निषादशरविद्धशूकरस्य सत्यव्रतमुनिना रक्षणोपायक्रमं विशदयत।

**निबन्धात्मकप्रश्नाः-**

1.सारस्वतबीजमन्त्रप्रभावेण मूर्खस्य उतथ्यस्य पण्डितसत्यव्रतत्वेन परिचयप्रसिद्धिं

विवृणुत ।

2. पुत्रेष्टियज्ञविधानेन देवदत्तब्राह्मणस्य पुत्रप्राप्तिक्रमं विशदयत ।

**एकाङ्कप्रश्नाः-**

1. पुत्रेष्टियज्ञस्य आयोजनं कः कृतवान् ।

2. पुरा कस्मिन् देशे देवदत्तनामकः एकः ब्राह्मणः आसीत् ।

3. देवदत्तस्य पुत्रेष्टियज्ञे कः उद्गाता आसीत् ।

4. देवदत्तस्य पुत्रेष्टियज्ञे कः होता आसीत् ।

5. देवदत्तस्य पुत्रेष्टियज्ञे कः अध्वर्युः आसीत् ।

6. देवदत्तस्य पुत्रेष्टियज्ञे कः ब्रह्मा आसीत् ।

7. देवदत्तस्य पुत्रस्य नाम किमासीत् ।

8. पुत्रेष्टियज्ञस्थले देवदत्तः कं भर्सितवान् ।

9. देवदत्तं कः अभिशप्तवान् ।

10. देवदत्तपुत्रः उतथ्यः वने कस्मिन् नदीतटे कुटीरं निर्माय न्यवसत् ।

11. देवदत्तस्य पुत्रेष्टियज्ञे कः प्रस्तौता आसीत् ।

12. गोभिलमुनिः केन छन्दसा सामगानं करोति स्म ।

**उत्तराणि-** 1. ब्राह्मणः देवदत्तः 2. कोशलदेशे 3. गोभिलमुनिः 4. बृहस्पतिः 5. याज्ञवल्क्यः 6. सुहोत्रः 7. उतथ्यः 8. गोभिलमुनिं 9. गोभिलमुनिः 10. गङ्गानदीतटे 11. पैलमुनिः 12. रथन्तरछन्दसा

**----------******---------**

# तृतीयांशः

**प्रस्थावना-**

पुराणवाङ्मयेषु देवीभागवपुराणमेकमन्यततमं वैशिष्ट्यमारोहते । देवीभागवतपुराणे 318 अध्यायाः, 18,000 श्लोकाः,द्वादशस्कन्धाश्च सन्ति पुराणवाङ्मये देवीभागवतं भुक्तिमुक्तिप्रदायकं पञ्चमपुराणमिति प्रोच्यते । अस्य पुराणस्य वक्ता महर्षिव्यासः श्रोता राजा जन्मेजयश्च भवति। देवीभागवतस्यानुशीलनेन ज्ञायते यत् देवी एव परमतत्वमस्ति, या निर्गुणा,नित्या,सर्वव्यापिका योगगम्या,जाग्रत्स्वप्नसुप्तिभ्यः परायां तुरीयावस्थायां विराजते । तत्र देवीभागवतपुराणस्य द्वादशस्कन्धेषु तृतीयस्कन्धे ब्रह्माण्डोत्पत्तिविषयकप्रश्नाः, उत्तराणि तथा ब्रह्मविष्णवीशानां त्रयाणां देवानां ब्रह्माण्डदर्शनादिविषयाः यथा विवृताः सन्ति, तथैव भगवत्याः कृपामाहात्म्यत्वेन सत्यव्रतचरितं, शशिकलासुदर्शनयोः परिणयवृत्तान्तः, नवरात्रविधानत्वेन श्रीरामचरितादिविषयाः अपि सम्यगालोचिताः सन्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य आदितः त्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र सारतः चतुरंशेषु उपन्यस्ताः सन्ति । ततः चतुरशेंषु तृतीयांशेस्मिन् मुख्यतया महाराजध्रुवसन्धिसम्बलितवृत्तान्तः, भगवत्याः कृपातः शशिकलासुदर्शनयोः परिणयवृत्तान्तश्च सम्यक् वर्णितोस्ति।

**उद्देश्यम्-**

प्रियपाठकाः श्रीमद्देवीभागवतस्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

**1. महाराजध्रुवसन्धिसम्बलितो वृत्तान्तः ।**

**2. ध्रुवसन्धेः मृत्योरनन्तरं राज्यभारग्रहणादिक्रमे विवादविषयाः तथा भारद्वाजमुनेः आश्रमपदे कामराजबीजमन्त्रं जप्त्वा सुदर्शनस्य भगवत्याः कृपाप्राप्तिश्च ।**

**3. राजकन्याशशिकलायाः सुदर्शने प्रेमासक्तिः एवञ्च तमेव स्वपतिरूपेण प्राप्तुं निष्पत्तिश्च ।**

**4. काशीनरेशस्य सुबाहोः कन्यायाः शशिकलायाः स्वयंवरसम्बन्धिताः विषयाः तथा अन्ततो गत्वा सुदर्शनेन साकं तस्याः परिणयवृत्तान्तश्च ।**

**महाराजध्रुवसन्धिसम्बलितो वृत्तान्तः**

जनमेजयः व्यासदेवं पृष्टवान् हे भगवन् ! भगवत्याः महिमा किमस्ति ? विस्तृततया कथय इति । तदनन्तरं व्यासदेव: देवीमहिमानं सम्यगुपस्थापयितुं पुरातनेतिहासमेकं जनमेजयं प्रोक्तुमारब्धवान् । तद्यथा- हे राजन् ! पुरा कोसलदेशे सूर्यवंशे महातेजस्वी एक: श्रेष्ठो राजा उत्पन्नोभूत् । सः महाराजः पुष्यपुत्र: ध्रुवसन्धिनाम्ना विख्यात आसीत् । तद्यथा-

कोशलेषु नृपश्रेष्ठ: सूर्यवंशसमुद्भव: ।
पुष्यपुत्रो महातेजा ध्रुवसंधिरिति स्मृतः ।।

ध्रुवसन्धे: द्वे भार्ये आस्ताम् । तस्य ज्येष्ठपन्त्याः नाम मनोरमा कनिष्ठपत्न्याः नाम च लीलावती आसीत् । मनोरमायाः पुत्रः सुदर्शनः एवं लीलावत्याः पुत्रश्च शत्रुजित् आसीत् ।

मनोरमा शुभे काले सुषुवे पुत्रमुत्तमम् ।
सुदर्शनाभिधं पुत्रं राजलक्षणसंयुतम् ॥

एकदा राजा ध्रुवसन्धि: मृगयार्थं वनं गतवान् । तत्र एकेन विशालकायेन बाहुवलयुतेन सिंहेन साकं तस्य युद्धमभूत् । युद्धे ध्रुवसन्धिः

सिंहस्योपरि प्रहारं कृतवान् । तत्पश्चात् सिंहोपि ध्रुवसन्धिमाक्रमितवान् । तत्र तस्मिन् युद्धे सिंहो ध्रुवसन्धिश्च उभावपि मृतौ सञ्जातौ । एवम्प्रकारेण देवीभागवते तृतीयस्कन्धे राज्ञः ध्रुवसन्धेः कथा वर्णितास्ति ।

**बोधप्रश्नः-**

1. ध्रुवसन्धिः कस्य देशस्य राजा आसीत्
2. सुदर्शनस्य मातुः नाम किमासीत्

**ध्रुवसन्धेः मृत्योरनन्तरं राज्यभारग्रहणादिक्रमे विवादविषयाः तथा भारद्वाजमुनेः आश्रमपदे कामराजबीजमन्त्रं जप्त्वा सुदर्शनस्य भगवत्याः कृपाप्राप्तिश्च**

महाराजस्य ध्रुवसन्धेः द्वे भार्ये आस्ताम् । तस्य ज्येष्ठपन्त्याः नाम मनोरमा कनिष्ठपत्न्याः नाम च लीलावती आसीत् । मनोरमायाः पुत्रः सुदर्शनः एवं लीलावत्याः पुत्रश्च शत्रुजित् आसीत् । तयोः सुदर्शनो ज्येष्ठ आसीत् । लीलावत्याः पुत्रः शत्रुजित् अत्यन्तं सुन्दरो मृदुभाषी च आसीत् । ततः सः शत्रुजित् नृपतेः प्रीतिजनकस्तथा प्रजानां मन्त्रिजनस्य च वल्लभोभूत् । एकदा राजा ध्रुवसन्धिः मृगयार्थं वनं गतवान् । तत्र एकेन विशालकायेन बाहुवलयुतेन सिंहेन साकं तस्य युद्धमभूत् । युद्धे ध्रुवसन्धिः सिंहस्योपरि प्रहारं कृतवान् । तत्पश्चात् सिंहोपि ध्रुवसन्धिमाक्रमितवान् । तत्र तस्मिन् युद्धे सिंहो ध्रुवसन्धिश्च उभावपि मृतौ सञ्जातौ । राज्ञः ध्रुवसन्धेः मृत्योरनन्तरं प्रजाः मन्त्रिगणाः महामुनिः कुलगुरुः वशिष्ठश्च ज्येष्ठराजकुमारं सुदर्शनमेव नृपं कर्तुं परस्परमालोचितवन्तः । एनं वृत्तान्तं श्रुत्वा लीलावत्याः पिता उज्जयिनीपतिः युधाजित् स्वदौहित्रस्य शत्रुजितः प्रियकाम्यया तत्र आजगाम । ततः मनोरमायाः पिता कलिङ्गाधिपतिः वीरसेनोपि स्वदौहित्रस्य सुदर्शनस्य हितकाम्यया तत्रोपस्थितोभूत् । ततः उभयोः नृपयोः मध्ये महान् विवादोभूत् । एवं विवदमानौ तौ राजानौ युद्धकामौ बभूवतुः । तदनु एवम्प्रकारेण घोरसंग्रामे संवृते तत्र राजकुमारशत्रुजितः मातामहः उज्जयिनीपतिः नृपतिः युधाजित् तीव्रैः सुदारुणैः बाणैः राजकुमारसुदर्शनस्य मातामहं कलिङ्गाधिपतिं वीरसेनं जघान । राज्ञः ध्रुवसन्धेः ज्येष्ठा पत्नी मनोरमा स्वपितुः वीरसेनस्य मरणवार्तां श्रुत्वा पितुर्वैरमनुस्मरन् भयत्रस्ता सञ्जाता । सा चिन्तितवती- किं करोमि क्व यामि, मम पिता रणे निहतोभूत् । एषः दुराशयो दुर्मतिः पापात्मा युधाजित् कदाचित् राज्यलोभेन मम पुत्रं सुदर्शनं हनिष्यति । एवं चिन्तापरा भूत्वा सा मनोरमा स्वपुत्रेण सुदर्शनेन साकं अन्ततो गत्वा भारद्वाजमुनेः आश्रमपदं प्राप्तवान् । ततः भारद्वाजमुनेः आश्रयं प्राप्य मनोरमा तत्र स्वपुत्रं सुदर्शनं पालयाना मुनिना दत्ते उटजे विदल्लेन सौरन्ध्रीसहिता च वीतशोका न्यवसत् । एकदा तत्र आश्रमपदे मुनिबालगतः क्रीडन् सुदर्शनः संयोगवशात् भगवत्याः कामराजाख्यं बीजमन्त्रं “क्लीं” इति मनसा धारितवान् । तद्यथा देवीभागवते-

बीजं वै कामराजाख्यं गृहीतं मनसा तदा ।

जजाप बालकोत्यर्थं धृत्वा चेतसि सादरम् ।।

प्रजपन्मनसा नित्यं क्रीडत्यपि स्वपित्यपि ।

विसस्मार न तं मन्त्रं ज्ञात्वा सारमिति स्वयम् ।।

सुदर्शनस्तु तां देवीं मनसा परिचिन्तयन् ।

राज्यलाभात्परं प्राप्य सुखं वै कानने स्थितः ।।

अतः भगवत्याः कामराजबीजमन्त्रः महत्वपूर्णस्तथा चमत्कारपूर्णश्च भवति । तस्य एकाक्षरमन्त्रजपेन राजकुमारः सुदर्शनः भूमिपतित्वं राज्यं प्रतिष्ठां यशः कीर्तिं पण्डितत्वं तथा अन्ततो गत्वा वरवर्णिनीं काशिराजकन्यां शशिकलाञ्च अधिगतवान् । एवम्प्रकारेण राज्ञः ध्रुवसन्धेः मृत्योरनन्तरं राज्यभारग्रहणादिक्रमे विवादविषयाः तथा भारद्वाजमुनेः आश्रमपदे कामराजबीजमन्त्रं जप्त्वा सुदर्शनस्य भगवत्याः कृपाप्राप्तिश्च इति विषयान् वयमत्र आलोचितवन्तः ।

**बोधप्रश्नः-**

1. लीलावत्याः पुत्रस्य नाम किम् ?

2. वीरसेनः कः ?

**राजकन्याशशिकलायाः सुदर्शने प्रेमासक्तिः एवञ्च तमेव स्वपतिरूपेण प्राप्तुं निष्पत्तिश्च**

काशीनरेशस्य सुवाहोः शशिकला नाम्नी एका पुत्री आसीत् । एकस्मिन् रात्रौ स्वयं जगदम्बा तस्याः स्वप्ने आगत्य आदिष्टवती यत्- हे शशिकले महर्षिभारद्वाजस्य आश्रमे सुदर्शनो नाम्ना एक: सर्वगुणसम्पूर्णो युवको राजपुत्रो वसति । तमेव सर्वगुणसम्पन्नं राजपुत्रं त्वं स्वपतिरुपेण वृणुहि । पुनः एकदा एकब्राह्मणमुखात् राजपुत्रसुदर्शनस्य सौमनस्यस्य सद्गुणानाञ्च वर्णनं श्रुत्वा शशिकला ततः सदैव मनसा सुदर्शनमेव स्वपतिरूपेण अभिलषितवती । एकदा शशिकला तेन ब्राह्मणमाध्यमेन स्वमनोवाञ्छां प्रकटयन्ती सुदर्शनस्य कृते प्रेमपत्रं प्रेषितवती । तद्यथा-

श्रुत्वा तद्वचनं श्यामा प्रेमयुक्ता बभूव ह ।
प्रतस्थे ब्राह्मणस्तस्मात्स्थानाद्भूत्वा समाहितः ॥

स्वप्नादेशादनन्तरं शशिकला सदैव मनसि केवलं सुदर्शनमेव तस्याः पतिरूपेण विचिन्त्य कामविरहदग्धा भूयः तदा तदा प्रमत्ता इव आलपति विलपति च स्म ।

**बोधप्रश्नः-**

1. शशिकला कस्य नरेशस्य पुत्री आसीत् ?

2. कस्य मुखात् शशिकला राजपुत्रसुदर्शनस्य सौमनस्यस्य सद्गुणानाञ्च विषये श्रुतवती ?

**काशिराजस्य सुबाहोः कन्यायाः शशिकलायाः स्वयंवरसम्बन्धिताः विषयाः तथा अन्ततो गत्वा सुदर्शनेन साकं तस्याः परिणयवृत्तान्तश्च**

पुरा एकदा काशिराजः सुबाहुः तस्याः कन्यायाः शशिकलायाः विवाहार्थमेकं स्वयंवरं आयोजितवान् । अस्मिन् प्रसङ्गे यथाशास्त्रं स्वयंवरमुद्दिश्य किञ्चिदालोचयामः । विद्वद्गणाः स्वयंवरः त्रिविधः इति प्रोक्तवन्तः । क्षत्रियाणां राज्ञां कृते स्वयंवरः उपयुक्तः न तु अन्येषां कृते । तद्यथा-

स्वयंवरस्तु त्रिविधो विद्वद्भिः परिकीर्तितः ।
राज्ञां विवाहयोग्यो वै नान्येषां कथितः किल ।।

विद्वद्गणाः स्वयंवरः त्रिविधः इति प्रोक्तवन्तः । ते यथा क्रमशः १. इच्छास्वयंवरः २. पणस्वयंवरः ३. शौर्यशुल्कस्वयंवरश्च भवन्ति । यथोक्तम्-

इच्छास्वयंवरश्चैको द्वितीयश्च पणाभिधः ।
यथा रामेण भग्नं वै त्र्यम्बकस्य शरासनम् ॥
तृतीयः शौर्यशुल्कश्च शूराणां परिकीर्तितः ।
इच्छास्वयंवरं तत्र चकार नृपसत्तमः ।।

काशिराजः इच्छास्वयंवरमायोजितवान् । अर्थात् अस्मिन् स्वयंवरे कन्या इच्छानुसारं स्वयं तस्याः वरचयनं करोति । परन्तु पणस्वयंवरे किमपि पणं तिष्ठति । यथा भगवान् श्रीरामः जानक्याः स्वयंवरे शिवधनुः भङ्गीकृत्य जानकीं स्वस्य पत्नीरूपेण प्राप्तवान् । शिवधनुः अत्र पणमासीत् । तृतीयः स्वयंवरः पृथ्वीराजविषये आसीत् । एवञ्च विवाहादिकं प्रचलति स्म । तथापि विवाहसमये किं के पश्यन्ति इति श्रुतिः वर्तते यथा-

कन्या वरयते रूपं माता वित्तं पिता श्रुतम् ।
बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥

काशिराजः सुबाहुः स्वकन्यायाः शशिकलायाः तस्मिन् स्वयंवरे विभिन्नदेशदेशान्तराणां राज्ञां राजकुमाराणाञ्च निमन्त्रणं विहितवान् । परन्तु तत्सभां प्रति सुदर्शनस्य कृते निमन्त्रणं नासीत् । परन्तु शशिकला स्वयं सुदर्शनस्य पार्श्वे एकसम्बादं प्रेषयित्वा सुदर्शनं निमन्त्रितवती । सुदर्शनोपि तत्रागतः । तत्र सभास्थले सुदर्शनं दृष्ट्वा प्रायशः राजानः तस्योपरि बहुलतया उपहासं कृतवन्तः । तद्यथा-

सुदर्शनोऽतिदुर्भाग्यो राज्यभ्रष्टो निराश्रयः ।
बलसैन्यविहीनश्च परित्यक्तस्तु बान्धवैः ।।

तथापि राजकन्या शशिकला तु केवलं भगवत्याः प्रियभक्तं सुदर्शनमेव स्वपतिरूपेण इच्छति स्म । परन्तु सुदर्शनेन साकं शशिकलायाः विवाहं कारयितुं तस्याः पिता सुवाहुः स्वीकृतिं न दत्तवान् । किन्तु शशिकला तस्याः निश्चये अटलासीत् । सुदर्शनादृते अन्यस्य कस्यापि सम्मुखे आगन्तुं शशिकला निराकृतवती । ततः स्वयंवरसभाङ्गणे निम्नोक्तप्रकारेण वार्तालापः प्राचलत् । तद्यथा-

मिलिता भूभुजः सर्वे त्वयाहूता: स्वयंवरे ।
कथमद्य नृपा गन्तुं योग्यास्ते स्वगृहान्प्रति ॥

सा राजकन्या शशिकला स्यमातुः पितुश्च वार्तामपि अमान्यं कृतवती । बहुप्रयासानन्तरमपि शशिकलायाः मनसः परिवर्तने असमर्था भूत्वा राजा सुबाहुः स्वेच्छां परित्यज्य अन्ततो गत्वा सर्वेषां राज्ञां सम्मुखे स्वकन्यायाः शशिकलायाः निष्पत्तिं श्रावितवान् । शशिकलायाः सुदर्शनविषयकं निष्पत्तिं श्रुत्वा तत्र सभाङ्गणे उपस्थिताः प्रायशः सर्वे राजानः क्रोधजर्जरिताः अभवन् । तदनन्तरं ते सर्वेपि राजानः बाहुबलप्रतियोगितां कर्तुमुक्तवन्तः । तत्र यो विजयी भविष्यति स एव शशिकलया साकं विवाहं करिष्यतीति । पुन: शशिकलापार्श्वे गत्वा राजा सुबाहुः स्वयंवरधिया विवाहार्थं निवेदितवान् । परन्तु शशिकला पुनरपि सम्मतिं न दत्तवती । तदनन्तरं शशिकला तस्याः पितुः सम्मुखे एकोपायमुक्तवती । हे पितृदेव ! रात्रौ निर्जनकाले गुप्तस्थाने गत्वा तत्र सुदर्शनेन साकं मम विवाहं कारयतु । तदनन्तरं राजा सुबाहुः रात्रौ एकस्मिन् गुप्तस्थले वैदिकब्राह्मणद्वारा सुदर्शनेन साकं शशिकलायाः विवाहं कारितवान् । अनन्तरं एतत् वृत्तान्तं ज्ञात्वा स्वयंवरार्थं समुपागताः प्रायशः सर्वेपि राजान: क्रोधजर्जरिताः भूयः तत्र युद्धार्थमागताः । सुदर्शनेन साकं ते सर्वे राजानः युद्धं कृतवन्तः । भगवत्याः कृपातः युद्धे सुदर्शनो विजयी अभवत् । तदनन्तरं भगवत्याः कृपातः विजयश्रीमण्डितः सुदर्शनः स्वनवविवाहितया पत्न्या शशिकलया सह तस्य राज्यं प्रति प्रस्थितवान् । एवम्प्रकारेण देवीभागवते शशिकलासुदर्शनयो: परिणयवृत्तान्तो वर्णितोस्ति ।

**बोधप्रश्नः-**

1.विद्वद्गणाः स्वयंवरः कतिविधः इति प्रोक्तवन्तः ?

2.काशिराजः कीदृशं स्वयंवरमायोजितवान् ?

## सारांशः

प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य आदितः त्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र सारतः चतुरंशेषु उपन्यस्ताः सन्ति । ततः चतुरशेंषु तृतीयांशेस्मिन् मुख्यतया महाराजध्रुवसन्धिसम्बलितवृत्तान्तः, तदनु ध्रुवसन्धेः मृत्योरनन्तरं राज्यभारग्रहणादिक्रमे विवादविषयाः तथा भारद्वाजमुनेः आश्रमपदे कामराजबीजमन्त्रं जप्त्वा सुदर्शनस्य भगवत्याः कृपाप्राप्तिश्च इत्ययं विषयः आविष्कृतोस्ति । तदनु राजकन्याशशिकलायाः सुदर्शने प्रेमासक्तिः एवञ्च तमेव स्वपतिरूपेण प्राप्तुं निष्पत्तिश्चेति विषयोपन्यस्तोस्ति । ततः काशीनरेशस्य सुबाहोः कन्यायाः शशिकलायाः स्वयंवरसम्बन्धिताः विषयाः तथा अन्ततो गत्वा सुदर्शनेन साकं तस्याः परिणयवृत्तान्तश्च इति एते विषयाः सरससुन्दरतयात्र तृतीयांशे वर्णिताः सन्तीति निश्चप्रचम् ।

## आदर्शप्रश्नाः

**लघुत्तरीयप्रश्नाः-**

1. त्रिविधस्वंयवरमुद्दिश्य लिखत ।

2. कामराजबीजमन्त्रविषये विलिखत ।

3. मनोरमायाः स्वपुत्रेण सुदर्शनेन साकं भारद्वाजमुनेः आश्रमपदे निवासनमुद्दिश्य लिखत ।

**विश्लेषणात्मकप्रश्नाः-**

1. महाराजध्रुवसन्धिसम्बलितं वृत्तान्तं विशदयत ।

2. काशिराजकन्याशशिकलायाः सुदर्शने प्रेमासक्तिः एवञ्च तमेव स्वपतिरूपेण प्राप्तुं निष्पत्तिश्चेति विषयं य़थाग्रन्थमालोचयत ।

**निबन्धात्मकप्रश्नाः-**

1. ध्रुवसन्धेः मृत्योरनन्तरं राज्यभारग्रहणादिक्रमे विवादविषयाः तथा भारद्वाजमुनेः आश्रमपदे कामराजबीजमन्त्रं जस्वा सुदर्शनस्य भगवत्याः कृपाप्राप्तिश्च इति विषयं विशदयत ।

2. काशीनरेशस्य सुबाहोः कन्यायाः शशिकलायाः स्वयंवरसम्बन्धिताः विषयाः तथा अन्ततो गत्वा सुदर्शनेन साकं तस्याः परिणयोभूदिति विषयं विषदयत

**एकाङ्कप्रश्नाः-**

1. ध्रुवसन्धिः कस्य देशस्य राजा आसीत् ।

2. पुष्यपुत्रः नाम कः ।

3. राज्ञः ध्रुवसन्धेः कति पत्यः आसन् ।

4. ध्रुवसन्धेः ज्येष्ठायाः पत्याः नाम किम् ।

5. मनोरमायाः पितुः माम किमासीत् ।

6. कामराजबीजमन्त्रस्य प्रथमवर्णः किम् ।

7. लीलावती का ।

8. लीलावत्याः पितुः नाम किमासीत् ।

9. सुदर्शनस्य मातुः नाम किम् ।

10. लीलावत्याः पुत्रस्य नाम किम् ।

11. वीरसेनः कस्य देशस्य राजा आसीत् ।

12. युधाजित् कस्य देशस्य राजा आसीत् ।

13. काशिराजस्य कन्यायाः नाम किमासीत् ।

14. काशिराजः नाम कः ।

15. स्वयंवरः कतिविधः ।

16. भारद्वाजमुनेः आश्रमपदे का आश्रयं प्राप्तवती ।

**उत्तराणि-** 1. कोसलदेशस्य 2 ध्रुवसन्धिः 3. द्वे पत्न्यौ 4. मनोरमा 5. वीरसेनः 6. क्लीं 7. राज्ञः ध्रुवसन्धेः कनिष्ठा पत्नी 8. युधाजित् 9. मनोरमा 10. शत्रुजित् 11. कलिङ्गदेशस्य 12. उज्जयिनीति देशस्य 13.शशिकला 14. सुबाहुः 15. त्रिविधः 16. राज्ञः ध्रुवसन्धेः ज्येष्ठा पत्नी मनोरमा

**----------******---------**

# चतुर्थांशः

**प्रस्थावना-**

पुराणवाङ्मयेषु देवीभागवपुराणमेकमन्यततमं वैशिष्ट्यमारोहते । देवीभागवतपुराणे 318 अध्यायाः, 18,000 श्लोकाः,द्वादशस्कन्धाश्च सन्ति पुराणवाङ्मये देवीभागवतं भुक्तिमुक्तिप्रदायकं पञ्चमपुराणमिति प्रोच्यते । यथोक्तम्-

देवीभागवतं पुराणममलं यद् वैष्णवानां धनं
धर्मो धर्मसुतेन यत्र गदितो नारायणेनामलः ।
गायत्र्याश्च रहस्यमत्र नितरां द्वीपस्य संवर्णितः
श्रीदेव्या हिमभूभृते भगवती गीता च गीता स्वयम् ।।

तत्र देवीभागवतपुराणस्य द्वादशस्कन्धेषु तृतीयस्कन्धे ब्रह्माण्डोत्पत्तिविषयकप्रश्नाः, उत्तराणि तथा ब्रह्मविष्णवीशानां त्रयाणां देवानां ब्रह्माण्डदर्शनादिविषयाः यथा विवृताः सन्ति, तथैव भगवत्याः कृपामाहात्म्यत्वेन सत्यव्रतचरितं, शशिकलासुदर्शनयोः परिणयवृत्तान्तः, नवरात्रविधानत्वेन श्रीरामचरितादिविषयाः अपि सम्यगालोचिताः सन्ति । प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य आदितः त्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र सारतः चतुरंशेषु उपन्यस्ताः सन्ति । ततः चतुरशेंषु चतुर्थांशेस्मिन् मुख्यतया देवीमहिमापुरःसरं श्रीरामचरितं नवरात्रविधानञ्चात्र सम्यक् सरससुन्दरतया उपन्यस्तमस्ति ।

**उद्देश्यम्-**

प्रियपाठकाः श्रीमद्देवीभागवतस्य प्रस्तुतेस्मिन् पाठ्यांशे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

1. राज्ञः जनमेजयस्य प्रश्नमुत्तरयन् व्यासदेवेन सविधि सविस्तरं देव्याः नवरात्रविधानोपस्थापनम् ।
2. महाराजजनमेजयस्य प्रश्नानुगुणं व्यासदेवेन श्रीरामचरितोपस्थापनम् ।
3. श्रीरामचन्द्रं प्रबोधयन् महर्षिनारदेन देवीमहिमाप्रख्यापनम् ।
4. महर्षिनारदोपदेशतः श्रीरामस्य नवरात्रविधानेन भगवत्याः कृपाप्राप्तिः ।

**राज्ञः जनमेजयस्य प्रश्नमुत्तरयन् व्यासदेवेन सविधि सविस्तरं**

**देव्याः नवरात्रविधानोपस्थापनम्**

श्रीमद्भागवतमिव श्रीमद्देवीभागवतमपि पुराणवाङ्गमये भुक्तिमुक्तिप्रदायकं पञ्चमं पुराणं प्रोच्यते । अस्मिन् पुराणे महर्षिव्यासः वक्ता, श्रोता च जनमेजयोस्ति । श्रीमद्देवीभागवते देव्याः महिमानपुरःसरं बहुतत्त्वानि विभिन्नकथाश्च द्वादशस्कन्धेषु उपन्यस्ताः सन्ति । श्रीमद्देवीभागवतस्य श्रद्धया पठनेन ब्राह्मणक्षत्रियवैश्यशूद्रादीनां कृते भुक्तिमुक्तिप्रदायकमुत्तमादप्युत्तमं सम्यक् साधु सुशोभनमैहिकं पारलौकिकञ्च सत्फलं समुपलभ्यते । तद्भूततया देव्याः नवरात्रविधानविषयाणां सम्यक् विवरणं यथाग्रन्थमत्र उपस्थाप्यते । तद्यथा- राज्ञः जनमेजयस्य देव्याः नवरात्रविधानविषयकं प्रश्नमुत्तरयन् व्यासदेवेन प्रोक्तम् यत्-

श्रुणु राजन् प्रवक्ष्यामि नवरात्रव्रतं शुभम् ।
शरत्काले विशेषेण कर्तव्यं विधिपूर्वकम् ॥

शरत्काले वसन्ते च प्रेमपूर्वकं नवरात्रविधानं करणीयम् । शरत्काले वसन्ते च ऋतौ अत्र नवरात्रविधानं कर्त्तव्यम् एवञ्च चैत्र तथा आश्विनमासे चण्डिकायाः पूजनं करणीयम् । अमावास्यायां व्रतसामग्री एकत्री कृत्वा एकभुक्तव्रतं तथा हविष्यं करणीयम् । समशुभे स्थले मण्डपं कृत्वा सम्यक् सज्जा करणीया यथा-

मण्डपस्तु प्रकर्तव्यः समे देशे शुभे स्थले ।
हस्तषोडशमानेन स्तम्भध्वजसमन्वितः ॥

भगवत्याः प्रतिमाऽभावे यन्त्रं पीठे संस्थाप्य कलशं पार्श्वे स्थापयेत् । कलशः पञ्चरत्नमयं सुतीर्थजलसम्पूर्णं भवेत् । पूजासामग्रीं संस्थाप्य गीतवाद्यध्वनिर्भवेत् । प्रथमे उपवासव्रतं, एकभुक्तव्रतं, नक्तव्रतञ्च कृत्वा पूजां कुर्यात् । मन्त्रोच्चारणपूर्वकं चन्दनागुरुकर्पुरैः, कुसुमैः सुगन्धिभिश्च पूजयेत् । एवम्प्रकारेण नवरात्रविधानं करणीयमिति श्रीमद्देवीभागवते प्रोक्तमस्ति ।

**बोधप्रश्नः-**

1.कस्मिन् काले प्रेमपूर्वकं नवरात्रविधानं करणीयम्

2.कस्मिन् स्थले मण्डपं कृत्वा सम्यक् सज्जा करणीया

### महाराजजनमेजयस्य प्रश्नानुगुणं व्यासदेवेन श्रीरामचरितोपस्थापनम्

महाराजजनमेजयस्य प्रश्नानुगुणं महर्षिव्यासदेवः श्रीरामचरितं वक्तुमारभत । तद्यथा व्यासदेवः कथयति- हे राजन् जनमेजय! पुरा अयोध्यायां दशरथो नामकः एकः प्रसिद्धः सूर्यवंशी राजा आसीत् । तस्य तिस्रः पत्न्यः आसन् । तस्य ज्येष्ठपत्नीकौशल्यातः विष्णोः अवतारः श्रीरामः अजायत । कैकेयीतः भरतस्तथा सुमित्रातो लक्ष्मणः शत्रुघ्नश्च अभवताम् । पितृसत्यं पालयतः श्रीरामो वनवासे गतः । ज्येष्ठभ्रातृभक्तो लक्ष्मणः पतिभक्तिपरायणा रामपत्नी सीता चापि राममनुसरतः रामेण साकं वने न्यवसताम् । एवं बहुतिथे गते एकदा रामद्वेष्वी लङ्काधिपतिः रावणः छलेन रामपत्नीं सीतामपहृत्य तस्य राजधान्यां लङ्कायामशोकवने स्थापितवान् । ततः सीताविरहितो रामः अत्यन्तं शोकापन्नः सन् विललाप । तदा नारदमहर्षिः तत्रोपस्थाय पत्नीविरहितं रामचन्द्रमाश्वास्य बहुकथामुक्तवान् । तदनु महर्षिनारदो रावणवधोपायत्वेन देव्याराधनपूर्वकं नवरात्रविधानमाचरितुं श्रीराममुपदिष्टवान् । महर्षिनारदस्योपदेशानुसारं श्रीरामः आश्विनमासे नवरात्रविधानेन देव्याराधनां विधाय अन्ततो गत्वा युद्धे रावणं सगणं मारयित्वा स्वपत्नीं सीतां पुनः सकुशलं प्राप्तवान् । ततो श्रीरामो बहुकालं यावत् अयोध्यायां प्रजानुरञ्जकतया राज्यशासनं कृतवान् । श्रीमद्देवीभागवते एवम्प्रकारेण नवरात्रविधानोपदेशक्रमेण श्रीरामचरितोपस्थापितम् ।

**बोधप्रश्नः-**

1. राज्ञः दशरथस्य कति पुत्राः आसन् ?
2. लङ्काधिपतिः कः ?

### श्रीरामचन्द्रं प्रबोधयन् महर्षिनारदेन देवीमहिमाप्रख्यापनम्

पितृसत्यव्रतं पालयतः श्रीरामचन्द्रस्य वनवासकाले रावणः छलेन रापपत्नीं सीतामपहृत्य लङ्कायामशोकवने स्थापितवान् । ततः सीताविरहितो रामः अत्यन्तं शोकापन्नः सन् विललाप । तदा नारदमहर्षिः तत्रोपस्थाय पत्नीविरहितं रामचन्द्रमाश्वास्य बहुकथामुक्तवान् । तदनु महर्षिनारदो रावणवधोपायत्वेन देव्याराधनपूर्वकं नवरात्रविधानमाचरितुं श्रीराममुपदिष्टवान् । ततो रामस्य प्रश्नानुगुणं नारदमहर्षिः देव्याः स्वरूपं महिमानञ्च सविस्तरं प्रोक्तवान् । तद्यथा- महर्षिनारदः कथयति हे राम! ज्ञायते यत् सा देवी एव परमतत्वमस्ति, या निर्गुणा,नित्या,सर्वव्यापिका योगगम्या,जाग्रत्स्वप्नसुप्तिभ्यः परायां

तुरीयावस्थायां विराजते । तस्याःतिस्त्र: शक्तयः, सात्त्विकी राजसी तामसी चेति क्रमशः लक्ष्मीः,सरस्वती,कालीरुपेण च प्रकटी भवन्ति । अनयैव च दृष्ट्या पुराणेषु ब्रह्मविष्णुमहेश्वराः त्रिमूर्तिरूपेण वर्णिता: सन्ति । एषा एव भगवती आदिशक्तिः जगतः जननी भवति । एषा भगवती कल्याणस्वरूपिणी मनोरथञ्च पूरयति । सा भवानी आदिशक्तिः बुद्धिं ददाति सिद्धिस्वरूपा च अस्ति । आदिशक्तिः भगवती एव सृष्टि-स्थिति-संहारस्य मूलकारणस्वरूपा भवति । अतः तां भगवतीं भुवनेश्वरीं वयं प्रणमामः । सर्वाभीष्टानां पूरणकारिणीं भगवतीं वयं नुमः । माता भगवती जगज्जननी एव एतस्मिन् सम्पूर्णसंसारे विराजते । भगवती भवानी जगज्जननी एव एतस्य जगतः सृष्टिसंहारस्य च तत्त्वं भवति । तस्याः एव व्यापकमाया संसारे ममत्वं सज्जीकरोति । अतः सा एव अखिल-जगन्मयी माता अस्ति । सा एव अखिलविश्वे व्यापकरूपेण विराजमाना वर्तते । सा एव प्रलयकाले संसारं भक्षयति । तस्याः वैभवं चरित्रं वा कः ज्ञातुं शक्नुयात् । यदा शङ्करः, ब्रह्मा विष्णुश्च भगवत्याः विषये ज्ञातुं न शक्नुयुः,  तदा तस्याः एतत् विस्तृतं अचिन्त्यम् ऐश्वर्यं नराः कथं ज्ञातुं पारयेयुः । भगवत्याः  इच्छातः एव शक्तिं प्राप्य ब्रह्मा सृजति, विष्णुः पालयति, महेशश्च संहरति । गिरिजानन्दिनी सा भगवती जगज्जननी भवानी एव सर्वेषां जगज्जातानां जङ्गमानां प्राणिनां माता अस्ति । जगत्सृजनं, पालनं संहरणञ्च तस्याः स्वाभाविककार्यं भवति । भगवत्याः आदिशक्तितः एव शक्तिं प्राप्य सूर्यः जगदिदं प्रकाशयति । भवती समग्रसंसारं उद्भासयति । भगवती आदिमाता आदिशक्तिः एव बुद्धिमतां जनानां बुद्धिः, शक्तिमतां जनानां शक्तिश्च भवति । सा शुद्धस्वरूपा अस्ति । मुक्तिदानं तस्याः स्वाभाविककार्यं भवति । वेदस्य मुख्यविषयः गायत्री भगवती एव भवति । स्वाहा, स्वधा एवं ओम् भगवत्याः रूपाणि भवन्ति । जीवानाम् उद्धरणार्थं भगवती अखिलजगदिदं रचितवती । सा देवी भगवती महाविद्या स्वरूपिणी अस्ति । तस्याः रूपं कल्याणमयमस्ति । सा कल्याणस्वरूपिणी देवी सम्पूर्णं मनोरथं पूरयति । अतः हे रामचन्द्र! त्वं युद्धे सगणं रावणं मारयित्वा विजयी भवितुं तामेव कल्याणस्वरूपिणीं आदिशक्तिं भगवतीमस्मिन् आश्विनमासे नवरात्रविधानेन आराधय ।

**बोधप्रश्नः-**

1. श्रीरामस्य पत्नीं सीतां छलेन कः अपहृतवान् ?

2. कः श्रीरामं नवरात्रविधानेन देव्याः आराधनां कर्तुमुपदिष्टवान् ?

**महर्षिनारदोपदेशतः श्रीरामस्य नवरात्रविधानेन भगवत्याः कृपाप्राप्तिः**

परमः प्रतापी श्रीरामो महर्षिनारदोपदेशं सत्यमिति ज्ञातवान् । ततः एकस्मिन् उत्तमे सिंहासने कल्याणमय्याः भगवत्याः जगदम्बिकायाः विग्रहं संस्थाप्य व्रती भूयो विधिविधानेन देवीपूजनमाचरितवान् । तस्मिन् समये आश्विनमासः आगतः आसीत् । उत्तमकिस्किन्ध्यापर्वतोपरि एषा व्यवस्था विहिता अभूत् । नव दिनानि यावत् उपवासव्रतमाचरन् श्रीरामो श्रेष्ठव्रतमेनं सम्यक् सम्पादयितुं संलग्नोतिष्ठत् । विधिवत् होमपूजनमपि विहितम् । ततः अष्टम्यां तिथौ मध्यरात्रे भगवती प्रकटिता अभूत् । पूजनोपरान्ते भगवती श्रीरमलक्ष्मणयोः कृते दर्शनं दत्तवती । पर्वतस्य समुच्चशिखरोपरि दण्डायमाना भूयो मेघगम्भीरवाणीभिः रामलक्ष्मणौ सा वक्तुमारब्धवती । देवी उक्तवती- हे विशालबाहुसम्पन्न श्रीराम ! इदानीमहं तव व्रताचरणेन सन्तुष्टास्मि । तव मनोरथः सिद्धोस्तु । मत्कृपातः भवान् पापिनं रावणं सगणं मारयित्वा प्रजानुरञ्जकधिया सुखपूर्वकतया एकादशसहस्रवर्षाणि यावत् अस्मिन् धरातले राज्यशासनं करिष्यति । श्रीरामस्य कृते एवम्प्रकारेण वरदानं विधाय भगवती ततः अन्तर्हितोभूत् । भगवत्याः कृपावरदानमधिगम्य श्रीरामः आनन्दसागरे मग्नोभूत् । ततो नवरात्रविधानं विजयदशमीपूजनञ्च सविधि सम्यक् सम्पाद्य श्रीरामो रावणविजयाय सुग्रीवेण लक्ष्मणेन च सह समुद्रतटदेशमागतवान् । ततः श्रीरामः समुद्रोपरि सेतुबन्धं निर्माय देवशत्रुं रावणं सगणं मारयित्वा सकुशलं स्वपत्नीं सीतामधिगतवान् । तदनु विजयश्रीमण्डितः श्रीरामः प्रजानुरञ्जकधिया सुखपूर्वकतया एकादशसहस्रवर्षाणि यावत् अस्मिन् धरातले राज्यशासनं कृतवान् । एवम्प्रकारेण श्रीमद्देवीभागवते श्रीरामस्य नवरात्रविधानेन भगवत्याः कृपाप्राप्तिविषयः सम्यगुपस्थापितोस्ति ।

**बोधप्रश्नः-**

1. श्रीरामः कस्मिन् पर्वतोपरि नवरात्रविधानेन देव्याराधनं विहितवान् ?

2. कः वानरराजः श्रीरामस्य सखा आसीत् ?

## सारांशः

प्रस्तुतपाठ्यक्रमेस्मिन् एतादृशस्य श्रीमद्देवीभागवतस्य तृतीयस्कन्धस्य आदितः त्रिंशदध्यायाः परीक्षार्थिनां सौविध्यार्थमत्र सारतः चतुरंशेषु उपन्यस्ताः सन्ति । ततः चतुरशेंषु चतुर्थांशेस्मिन् मुख्यतया राज्ञः जनमेजयस्य प्रश्नमुत्तरयन् व्यासदेवेन सविधि सविस्तरं देव्याः नवरात्रविधानोपस्थापनं,महाराजजनमेजयस्य प्रश्नानुगुणं व्यासदेवेन श्रीरामचरितोपस्थापनं,श्रीरामचन्द्रं प्रबोधयन् महर्षिनारदेन देवीमहिमाप्रख्यापनं तथा महर्षिनारदोपदेशतः श्रीरामस्य नवरात्रविधानेन भगवत्याः कृपाप्राप्तिरिति विषयाः सम्यगुपस्थापिताः सन्ति ।

### आदर्शप्रश्नाः

**लघुत्तरीयप्रश्नाः-**

1. किस्किन्ध्यापर्वतविषये लिखत ।

2. रामसखं सुग्रीवमुद्दिश्य लिखत ।

3. रामस्य कृते देव्याः कृपावरदानमाविष्कुरुत ।

**विश्लेषणात्मकप्रश्नाः-**

1. पत्नीविरहितस्य रामचन्द्रस्य शोकापन्नत्वमाविष्कुरुत ।

2.पत्नीविरहितत्वात् शोकापन्नस्य रामचन्द्रस्य कृते महर्षिनारदोपदेशमाविष्कुरुत ।

**निबन्धात्मकप्रश्नाः-**

1. श्रीमद्देवीभागवतानुसारं श्रीरामचरितमुपस्थापयत ।

2. सविधि सविस्तरं देव्याः नवरात्रविधानविषयमुपस्थापयत ।

**एकाङ्कप्रश्नाः-**

1. रामस्य सखा वानरराजः कः ।

2. रामस्य प्रियतमानुजः कः ।

3. श्रीरामस्य पत्न्याः नाम किम् ।

4. लङ्काधिपतिः राक्षसराजः कः ।

5. रामपत्नीं सीतां कः छलेन अपहृतवान् आसीत् ।

6. महाराजजनमेजयं नवरात्रविधानेन देव्याराधनां कर्तुं कः उपदिष्टवान् ।

7. श्रीरामं नवरात्रविधानेन देव्याराधनां कर्तुं कः उपदिष्टवान् ।

8. नवरात्रं पालयितुं कस्मिन् स्थले मण्डपं विधाय सज्जा करणीया ।

9. सिंहवाहिनी देवी का ।

10. श्रीरामः कस्मिन् वंशे समुत्पन्नः आसीत् ।

11. महाराजदशरथस्य कति पुत्राः आसन् ।

12. कौशल्यानन्दवर्धनः कः ।

**उत्तराणि-** 1. सुग्रीवः 2. लक्ष्मणः 3. सीता 4. रावणः 5. रावणः 6. व्यासदेवः 7. नारदमहर्षिः 8. शुभसमस्थले 9. भगवती दुर्गा 10. सूर्यवंशे 11. चत्वारः 12. श्रीरामः

**----------******---------**